# dhanadA kavacham

# ધનદાકવચમ્

## Document Information

Text title : dhanadA kavacham

File name : dhanadaakavach.itx

Category : kavacha, devii, devI

Location : doc_devii

Author : Traditional

Proofread by : Sridhar - Seshagiri <seshagir at engineering.sdsu.edu>

Latest update : December 29, 2001, August 3, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# ધનદાકવચમ્

દેવ્યુવાચ
ધનદા યા મહાવિદ્યા કથિતા ન પ્રકાશિતા ।
ઇદાનીં શ્રોતુમિચ્છામિ કવચં પૂર્વસૂચિતમ્ ॥

શિવ ઉવાચ
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ કવચં મંત્રવગ્રહમ્ ।
સારાત્સારતરં દેવિ કવચં મન્મુખોદિતમ્ ॥

ધનદા કવચસ્યાસ્ય કુબેર ઋષિરીરિતઃ ।
પંક્તિશ્છન્દો દેવતા ચ ધનદા સિદ્ધિદા સદા ॥

ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
ધં બીજં મે શિરઃ પાતુ હ્રીં બીજં મે લલાટકમ્ ॥

શ્રી બીજં મે મુખ પાતુ રકારં હૃદિ મેઽવતુ ।
તિકારં પાતુ જઠરં પ્રિકારં પૃષ્ઠતોઽવતુ ।
યેકારં જંઘયોર્યુગ્મે સ્વાકારં પાદયોર્યુગે ।
શીર્ષાદિપાદપર્યન્તં હાકારં સર્વતોઽવતુ ॥

ઇત્યેતત્કથિતં કાન્તે કવચં સર્વસિદ્ધિદમ્ ।
ગુરુમભ્યર્ચ્ય વિધિવત્ કવચં પ્રપઠેદ્યદિ ॥

શતવર્ષ સહસ્રાણાં સહસ્રાણાં પૂજાયાઃ ફલમાપ્નુયાત્ ।
ગુરુપૂજાં વિના દેવિ નહિ સિદ્ધિઃ પ્રજાયતે ॥

ગુરુપૂજાત્પરો ભૂત્વા કવચં પ્રપઠેત્તતઃ ।
સર્વસિદ્ધિયુતો ભૂત્વા વિચરેદ્ ભૈરવો યથા ॥

પ્રાતઃકાલે પઠેદ્યસ્તુ મંત્રજાપપુરઃ સરમ્ ।
સોઽભીષ્ટફલમાપ્નોતિ સત્યં સત્યં ન સંશયઃ ॥

પૂજાકાલે પઠેદ્યસ્તુ દેવીં ધ્યાત્વા હૃદમ્બુજે ।
ષણ્માસાભ્યન્તરે સિદ્ધિર્નાત્ર કાર્યા વિચારણા ।
સાયંકાલે પઠેદ્યસ્તુ સ શિવો નાત્ર સંશયઃ ।
ભૂર્જે વિલિખ્ય ગુટિકાં સ્વર્ણસ્થાં ધારયેદ્યદિ ॥

પુરુષો દક્ષિણે બાહૌ યોષિદ્વામભુજે તથા ।
દક્ષિણે બાહૌ યોષિદ્વામભુજે તથા ।
સર્વસિદ્ધિયુતી ભૂત્વા ધનવાન્ પુત્રવાન્ ભવેત્ ॥

ઇદં કવચમજ્ઞાત્વા યો જપેદ્ધનદાં શુભે ।
શસ્ત્રઘાતમવાપ્નોતિ સોઽચિરાન્મૃત્યુમાપ્નુયાત્ ॥

કવચેનાવૃતો નિત્યં હિ યત્રૈવ ગચ્છતિ ।
તત્રૈવ સ મહાદેવિ સમ્પૂજ્યો નાત્ર સંશયઃ ॥

॥ ઇતિ ધનદા કવચં સમ્પૂર્ણમ્ ॥

It is mentioned in the phalashrutiH that kavacham should be recited before doing any serious mantra or nAma japam to avoid afflictions and get full benefits.

---

*dhanadA kavacham*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*